ISSN : 2349-4557

# SURABHI

## International Peer-Reviewed Refereed Journal

24th Issue March-2019

Editor in Chief:
Mr. Rohit Parmar

### Advisory Board

- Prof. H. N. Vaghela (Former Acting V. C.)
  Professor & Head,
  Department of Hindi,
  M. K. Bhavnagar University, Bhavnagar,
  Gujarat, India
- Prof. (Dr.) Chetan Trivedi
  (I/C Vice Chancellor)
  Bhakta Kavi Narsinh Mehta University,
  Junagadh, Gujarat, India
- Dr. R. P. Bhatt
  Principal,
  Bahauddin Govt. Science College, Junagadh,
  Gujarat, India
- Prof. Jaydipsinh K. Dodiya
  Professor & Head,
  Department of English & CLS,
  Saurashtra University, Rajkot, Gujarat
  India
- Dr. Martina R. Noronha
  Principal,
  Sir K. P. College of Commerce, Surat
  Gujarat, India

### Editorial Board

- Dr. Jiten J. Parmar (GES-II)
  Assi. Professor,
  Bahauddin Govt. Arts College, Junagadh,
  Gujarat, India
- Mr. Dilip B. Kataliya (GES-II)
  Assi. Professor,
  Bahauddin Govt. Arts College, Junagadh,
  Gujarat, India
- Dr. Arjun G. Dave
  Founder & Owner
  Vedant Educational Services, Rajkot
  Gujarat, India
- Dr. Pravat Dangal
  Associate Professor,
  St. Joseph's College, Darjeeling,
  West Bengal, India
- Dr. Dnyaneshwar L. Sonawane
  Assi. Professor,
  Swami Ramanand Teerth Mahavidyalaya,
  Ambajogai, Dist. Beed, Maharashtra, India

Scanned with CamScanner

# INDEX


1. મનુષ્ય મનની સંકુલ ગતિવિધિનું મનોવૈજ્ઞાનિક આલેખન
   ડૉ. દિલીપ આર. અમીન..........1
2. ધોરણ સાતમાં અભ્યાસ કરતા વિદ્યાર્થીઓ માટે મૌખિક ગણન કૌશલ્ય વિકાસ કાર્યક્રમની અસરકારકતા
   કિશન એ. સુરાણી..........6
3. Opportunities for skill development in higher education
   Trupti V. Vala..........10
4. Present Scenario Human Resource Management in Industry
   Mrs. Artiben Patel..........13
5. वैदिकसाहित्ये कृषिपशुपालनव्यवस्था
   जिगरः एम. भट्टः..........18
6. A study on Profitability Analysis of ICICI and HDFC
   Dhvani K. Dalwadi..........20
7. भक्तियुग का एक अनमोल रत्न : मीरांबाई
   डॉ. राकेश चौधरी..........25
8. पर्यावरण पर औद्योगीकरण का प्रभाव
   Dr. Ankita Harsadray Maheta..........27
9. ગુજરાતનો પ્રવાસન ઉદ્યોગ વિકાસના પંથે..........
   Dr. Pranali K. Joshi..........29
10. Teacher as a Transformer of [illegible] and Wisdom For Sustainable Character Development
    Mr. Aalap Rameshchandra Suthar..........31
11. સહભાગી સિંચાઈ વ્યવસ્થાપન
    કપિલાબેન એસ. વસાવા..........38
12. સ્ત્રીઓ અંગેના મહાત્મા ગાંધીના વિચારો
    પૂજા એચ. મકવાણા..........40
13. વૈશ્વિક ક્ષેત્રે ભારતીય તેમજ ગુજરાતી ડાયસ્પોરા
    Govind U. Baraiya..........42
14. फणीश्वरनाथ 'रेणु' के आँचलिक उपन्यासों में चित्रित भौगोलिकता
    डॉ. हिनाबहन आई. पटेल..........46
15. હનુમાન જન્મની કથાઓ
    રસિક બાબરિયા..........51
16. Violence and torture as the tools of power in J.M. Coetzee's *Waiting for the Barbarians*
    Augustin Rayappa..........53


Scanned with CamScanner

# ॥ वैदिकसाहित्ये कृषिपशुपालनव्यवस्था ॥



जिगरः एम्. भट्टः
( साहित्याध्यापकः)
"श्रीसोमनाथसंस्कृतविश्वविद्यालयसञ्चालितः
संस्कृतमहाविद्यालयः
वेरावलम् गुजरातः"।

वैदिकसाहित्याध्ययनेन तत्र स्थिता अर्थव्यवस्था अस्माभिः ज्ञायते । अस्मिन् साहित्ये कृषि-पशुपालन-विभिन्नोद्योग-व्यापारादिविषयाणाम् अर्थव्यवस्थया सह सम्बद्धं वर्णनं प्राप्यते । वस्तुतः कस्यचिदपि देशस्य अर्थव्यवस्थायाः सुचारु सञ्चालनाय तस्य देशस्य कृषेः अधिकं महत्वं भवति । भारतं तु प्राचीनकालादेव कृषिप्रधानः देशः इति सर्वविदितम् । कृषेः जीवनाधायकं तत्त्वं प्रमुखतया भूमिः पर्जन्यश्च वर्तते अत एव अथर्ववेदीयपृथ्वीसूक्ते कृषिप्रधानदेशाय भूमेः पर्जन्यस्य च नमस्कारः विहितः –

**भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षमेदसे ।**[१]

किञ्च भूमिः माता पर्जन्यश्च पिता कथितः । पृथ्वीसूक्ते ऋषिभिः यथा पृथिव्याः गौरवं प्रकटितं तेन ज्ञायते यत् वैदिके काले सर्वेऽपि पृथ्वीं प्रति सम्पूर्णतया जागरूकाः आसन् । कृषेः तदुपकरणानाञ्च वर्णनं वैदिकसाहित्ये विस्तृतं प्राप्यते । वेदेषु कृषिकार्यं गौरवयुक्तं कथितम् अस्ति अत एव इन्द्रः पूषा च कृषिकर्मणि नियुक्तौ इत्यथर्ववेदे वर्णितम् ।[२] ऋग्वेदे द्यूतादीन् दुर्गुणान् त्यक्त्वा सुखार्थं कृषिकर्मणः उपदेशः प्रदत्तः वर्त्तते –

**अक्षैर्मा दीव्यः कृषिमित् कृषस्व ।**[३]

यजुर्वेदे राज्ञः चत्वारि प्रमुखकर्त्तव्यानि निर्दिष्टानि सन्ति –

१. **कृषेः उन्नतिः**
२. **जनकल्याणम्**
३. **राष्ट्रस्य श्रीवृद्धिः**
४. **राष्ट्रस्य पुष्टिः**

**कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा ।**[४]

अत्र सर्वाधिकं प्राधान्यं कृषेः वर्त्तते । इदं शातपथं वचः – कृषिकर्म सङ्क्षेपेण चतुर्षु शब्देषु वर्णितम् – **कृषन्तः , वपन्तः , लुनन्तः , मृणन्तः**[५] इति । ऋग्वेदे अथर्ववेदे च वेनपुत्रः पृथुः कृषिविद्यायाः आविष्कारकः कथितः । तेन सर्वेषां मनुष्याणां कृते कृषिकर्मणा अनेकविधमन्नम् उत्पादितम् ।

**तां पृथी वैन्योऽधोक् तां कृषिं च सस्यं चाधोक् ।**[६]

वैदिकसंहितासु अनेकानि सूक्तानि तादृशानि सन्ति यत्र कृषिसम्बद्धं निरूपणं वर्त्तते । यथा वपनात्पूर्वं क्षेत्रस्य स्वच्छता, कृषिकार्यार्थम् उत्तमसाधनानां बीजानां च प्रयोगः, ऋत्वनुसारं बीजचयनम्, यथासमयं सेचनादिकम् इत्यादिः ।[७] भूमेः अपि बहवो भेदाः प्राप्यन्ते तत्र त्रयः मुख्यभेदाः सन्ति-[८]

१- उर्वरा
२- सस्या
३- ऊषरा

मृदोऽपि कतिपयभेदानाम् उल्लेखः प्राप्यते यथा मृत्तिका ( स्निग्धा ), रजोभूमिः ( सामान्या ), अश्मा ( पाषाणयुक्ता ) इरिन्या ( कृष्यर्थमनुपयुक्ता ), उर्वरा ( कृष्यर्थमुत्तमा ) इति ।[९] कृषेः अपि भेदद्वयमस्ति वर्ष्या अवर्ष्या च ।[१०] वर्ष्या वर्षाधारिता यथा व्रीह्यादिः , अवर्ष्या अवृष्टिनिर्भरा यथा कार्पासादिः । केषाञ्चन अन्नानाम् उत्पत्तिः कृष्टायां भूमौ केषाञ्चन पुनः अकृष्टायां भूमौ भवति ।

**कृष्टपच्याश्च मे अकृष्टपच्याश्च मे ।**[११]

तैत्तिरीयसंहितायां सस्यानां पाकस्य कालद्वयं निरूपितम् अस्ति शारदीयः ( खरीफपाकः) वासन्तः ( रविपाकः ) च ।[१२] तथैव लवनकालाधारेण चत्वारः प्रकाराः सस्यानां प्राप्यन्ते । यथा –

**यवं ग्रीष्माय व्रीहीन् शरदे .......।**[१३]

यजुर्वेदे अन्नानां द्वादश नामानि प्राप्यन्ते तानि यथा – व्रीहिः , यवः , माषः , तिलम् , मुद्गः, चणकम्, प्रियङ्गुः , अणुः , श्यामाकः , नीवाराः , गोधूमः, मसूरश्च ।[१४]

ऋग्वेदे हलम् लाङ्गलम्, हलचालकः कीनाशः, हलेन जाता रेखा सीता , हलस्य दण्डः शुनाशीरः, दीर्घयष्टिः ईषा , वृषभयोः स्कन्धस्थं योजकं युगम्, वृषभश्च वाहः , तथा पाशः अष्ट्रा , इति उच्यन्ते ।[१५]

वैदिकसाहित्ये कृषिकार्यवत् पशुपालनस्याऽपि वैशिष्ट्यं दृग्गोचरीभवति । सामाजिकजीवनेन सह पशुसम्पदः सम्बन्धः अद्यापि दृश्यते । कृष्यर्थं



Scanned with CamScanner

दुग्धादिद्रव्यार्थं ऊर्णवस्त्रार्थं युद्धार्थं गमनागमनार्थं च वृषभाश्वादीनां पशूनां नितान्तम् उपयोगो भवति स्म । वैदिकवाङ्मये पशुपालनार्थं पशुसंरक्षणार्थं च कानिचन सूक्तानि प्राप्यन्ते । अथर्ववेदे पशुसम्वर्धनार्थम् आवश्यकोपायाः वर्णिताः सन्ति यथा – पशूनां कृते तृणाद्याहाराणां शुद्धजलस्य शुद्धवायोः च व्यवस्था समीचीना स्यात् । तेषां निवासः चोरभयरहितः वातावरणानुकूलितः स्यात् ।[१६]

वेदेषु सर्वाधिकं महत्वं गवे प्रदत्तम् अस्ति । गौः सर्वेषां देवानाम् अधिष्ठानम् उच्यते यथा –

**एतद्वै विश्वरूपं सर्वरूपगोरूपम् ।[१७]**

गवां प्रशंसायाम् उक्तम् अस्ति यत् गवां विनाशो न भवति, तस्कराः ताः न पीडयन्ति, युद्धभूमौ धूलिधूसरितः अश्वः तासां समीपं न गच्छति । अथर्ववेदेऽपि उक्तं यत् गौः कृशपुरुषं पुष्टं करोति, पाण्डुवदनं लालिमयुक्तं करोति, निस्तेजं तेजस्विनं करोति । गवां ध्वनिना सम्पूर्णं वातावरणं मङ्गलमयं भवति । अतः विद्वांसः सभायां गवां गुणान् गायन्ति यथा –

**यूयं गावो मोदयथा कृशं चिद् अश्रीरं चित्**
**कृणुथा सुप्रतीकम् ।**
**भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते**
**सभासु ॥[१८]**

गोषुवर्चस्तेजोभगयशःपयस्सरसतादीनां गुणानां समावेशः अथर्ववेदे निरूपितः यथा – वर्चो.... तेजो.... भगो.... यशो.... गोषु प्रविष्टम् ।[१९] अतः गौः अवध्या तथा सौभाग्यलक्षणा दर्शिताऽस्ति ।

**अघ्नेयं सा वर्धतां महते सौभगाय ।[२०]**

वेदेषु पशुभ्यः अभयं भवतु इति भावः प्रणिरूपितः अस्ति ।[२१] पशूनां वधः दण्डनीयः अपराधः उक्तोऽस्ति अतः अथर्ववेदे यजुर्वेदे च गवां द्विपदानां चतुष्पदानां च पशूनां हिंसा निन्दिताऽस्ति ।[२२] यजुर्वेदे अश्वहन्तारं वरुणः दण्डयतीति निरूपितमस्ति यथा -

**यो अर्वन्तं जिघांसति तमभ्यमीति वरुणः ।[२३]**

वस्तुतः कृषिकार्यं पशुपालनं च परस्परं सम्बद्धम् अस्ति अतः वेदेषु अनेकत्र पशुधनवृद्ध्यर्थं देवाः प्रार्थिताः सन्ति । वेदेषु पशुपालनं न केवलं व्यक्तिगतम् अपितु व्यवसायरूपेणापि तस्य उल्लेखः अवलोक्यते । निष्कर्षरूपेण इदं वक्तुं शक्यते यद्वैदिकसाहित्ये कृषिपशुपालनव्यवस्था अत्यन्तं सम्पन्ना समृद्धा च उपवर्णिताऽस्ति यस्याः आवश्यकता वर्त्तमाने भविष्यति च काले सर्वथा प्रतीयते इति ।

**॥ सङ्केतसूचिः ॥**


१. अथर्ववेदः -१२-१-४२ ।
२. तत्रैव – ३-१७-४ ।
३. ऋग्वेदः – १०-३४-०७ ।
४. यजुर्वेदः – ९-२२ ।
५. शतपथब्राह्मणम् – १-६-१-३ ।
६. अथर्ववेदः – ८-१०-११ ।
७. ऋग्वेदः – १०-१०१-४ ।
८. यजुर्वेदः – १६-३३,४२,४३ ।
९. तत्रैव – १८-१३, १३-३३,४३,४५ ।
१०. तत्रैव – १६- १८ ।
११. तत्रैव – १८-१४ ।
१२. तैत्तिरीयसंहिता – ५-१-७-३ ।
१३. तत्रैव – ७-२-१०-२ ।
१४. यजुर्वेदः – ८-१२ ।
१५. वैदिकसाहित्य और संस्कृति का स्वरूप – पृष्ठ – २९१ ।
१६. अथर्ववेदः – ७-७३-१२, ७-७५-१,२ ।
१७. तत्रैव – ९-७-२५ ।
१८. तत्रैव – ४-२१-६ ।
१९. तत्रैव – १४-२-५३,५८ ।
२०. तत्रैव – ७-७३-०८ ।
२१. यजुर्वेदः – ३६-२२ ।
२२. अथर्ववेदः – ११-२-१, १०-१-२९ ।
२३. यजुर्वेदः -२२-५ ।



जिगरः एम्. भट्टः
( साहित्याध्यापकः)
"श्रीसोमनाथसंस्कृतविश्वविद्यालयसञ्चालितः
संस्कृतमहाविद्यालयः
वेरावलम् गुजरातः" ।




Scanned with CamScanner